हृदयस्यानशून्यत्वात् विशिष्टचेतनावत्त्वं नास्ति सुखदुःखानुभवमात्रं तु तेषां जायते एवेति विशेषः तेनैव स्वस्वकर्म्मफलानुरूपदुःखानुभवात् स्वस्वकर्म्मफलभाक्त्वम् इति सुस्थितम्। चेतनाशून्ये पदार्थमात्रे त्रि०। "अचेतनं चेतनावदिव लिङ्गमिति" सा०का०। तत्तद्विशेषज्ञानशून्ये च। "तन्तु दुःखाभिसन्तप्तं विलपन्तमचेतनमिति पुरा०। अत्र दुःखानुतप्तत्वेन तदनुभवस्योक्तेः तथाभूतेऽपि चेतने अचेतनत्वोक्तिः विवेकज्ञानशून्यत्वपरत्वेनैव, एवमन्यत्रापि। "अहङ्कारलये सुप्तौ भवेद्देहोऽप्यचेतन" इत्युक्तिस्तु देहस्य चैतन्यप्रकाशावच्छेदकतया, जागरे स्वप्ने च चैतन्यमुपचर्य्य सुषुप्तौ अवच्छेद्याहङ्काररूपमनसो लयात् कथमवच्छेदकत्वं? स्यादित्यतोऽचेतनत्वमित्येवंपरा। अन्यथा "शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः" इत्युक्तेः देहे सदा चैतन्याभावस्य सिद्धत्वात् सुषुप्तौ तथात्वकथनमनर्थकं स्यात्। सुषुप्तावपि इन्द्रियाणां मनसश्च विशिष्टव्यापारराहित्येन लयत्वोपचारः किन्तु आत्मनि तदापि चैतन्यमस्त्येव। "आनन्दभुक् चेतोमुखः प्राज्ञ" इति श्रुतेः सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति" सुप्तोत्थितस्य परामर्शाच्च आनन्दानुभवस्य तत्रापि सत्त्वात् सुतरां देहस्य तदनुभवज्ञानावच्छेदकत्वमस्त्येवेति विशेषः। विस्तरस्तु सुषुप्तिशब्दे वक्ष्यते।

**अचेतस्** त्रि० न चेतति चित-असुन् न० त०। चेतनाशून्ये अचेतने घटादौ, तत्तद्विषयज्ञानरहिते च। "गतसंज्ञमचेतसमिति" पुरा०। नास्ति चेतोऽस्य। चित्तरहिते त्रि०।

**अचेतान** त्रि० चित-शानच् वेदे न मुक् न० त०। चैतन्यरहिते "अचेतानस्य मा पथो वि दुक्षः इति" वेदः।

**अचेष्ट** त्रि० नास्ति चेष्टा यस्य। चेष्टारहिते। चेष्टा च "आत्मजन्या भवेदिच्छा-इच्छा जन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया" इत्युक्तेः यत्नसाध्या क्रियाजनकव्यापाररूपा। चेतनाधिष्ठितदेहेष्वेव कर्म्मविशेषः न तदनधिष्ठिते तथा च यस्मिन् देहे आत्मनो यत्नो भवति तद्देहावच्छेदेनैव चेष्टा जायते नान्यस्मिन् सा च उद्यमरूपैव। मनोवायुभिन्नद्रव्यस्य न स्वतःक्रिया सम्भवति किन्तु गुरुत्वाद्याघातनोदनादिनैव क्रिया भवति नान्यथा। तथा च हस्तादिचालनदर्शनात् तत्कारणीभूतनोदनादिकमनुमीयते तच्च नोदनम् आत्मकर्त्तृकमेव अन्यथानुपलब्धेः। अधिकं चेष्टाशब्दे वक्ष्यते।

**अचेष्टता** स्त्री अचेष्टस्य भावः। चेष्टाराहित्ये।

**अचैतन्य** त्रि० नास्ति चैतन्यं चेतना यस्य। चैतन्यशून्ये। "अचैतन्यमिदं विश्वं दैवं चैतन्यमेव यदिति"। न०त०। चैतन्यभिन्ने न०।

**अच्छ** अव्य० न च्छ्यति दृष्टिं सम्मुखत्वात् छो-क न०त०। आभिमुख्ये। "अच्छा न्वचचा असरत् पवित्रे इति" वेदः। "अच्छ गत्यर्थवदेष्विति" सूत्रे "अच्छगत्य अच्छोद्य इत्युदाहृत्य अभिमुखं गत्वा अभिमुखमुक्त्वेति" व्याकृतम् सि०कौ०।

**अच्छ** त्रि० न छ्यति दृष्टिम्, छो-क न०त०। स्वच्छे निर्म्मले। निर्मले हि वस्तुनि दृष्टिः प्रसरति न तु समले आभ्यन्तरपर्य्यन्तं धावतीति निर्मलस्यैव तदप्रतिबन्धकत्वात्तथात्वम्। "स्वच्छन्दोच्छलदच्छकच्छकुहरेति काव्यप्र०। स्फटिके पु०। न छ्यति भक्षयति नाशितसत्त्वं छो-भक्षणे क न०त०। भल्लूके पु०। अच्छभल्लुक इत्येकं नामेत्यन्ये।

**अच्छन्दस्** त्रि० नास्ति अध्येयत्वेन छन्दोवेदोऽस्य तुक्। वेदाध्ययनशून्ये अनुपनीते बालके, सर्व्वथा तच्छून्ये शूद्रादौ च। नास्ति छन्दो वृत्तानुसारी, परिमितमात्राक्षरादिसन्निवेशविशेषो यत्र ७त० तुक्। छन्दःशून्ये गद्यात्मके, चूर्णके वा शब्दसमूहे। नास्ति छन्दोभिप्रायो यस्य ब० तुक्। अभिप्रायशून्ये। वा कपि। अच्छन्दस्कोऽप्युक्तार्थेषु।

**अच्छावाक** पु० अच्छं निर्म्मलम् अच्छ आभिमुख्येन वा वक्ति शंसति वच-कर्त्तरि संज्ञायां घञ् (निपातस्य चेति) दीर्घः। शंसनकर्त्तरि होतृसहकारिणि सोमयागसम्बन्धिनि ऋत्विग्भेदे। स च आश्वलायनेन दर्शितः। "प्रागपि सोमेनैके, इत्युपक्रम्य, "तस्यर्त्विजः, चत्वारस्त्रिपुरुषाः, तस्य तस्योत्तरे त्रयः, होता, मैत्रावरुणोऽच्छावाको ग्रावस्तुत्, अध्वर्युः, प्रतिप्रस्थाता नेष्टोन्नेता, ब्रह्मा, ब्राह्मणाच्छंस्याग्नीध्रः पोता, उद्गाता, प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्य इति, एतेऽहीनैकाहैर्याजयन्ति, एत एवाहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशा दीक्षित्वा समाप्याग्नींस्तन्मुखाः सत्राण्यासते" इति। "अस्यायमर्थः, दर्शपूर्णमासाभ्यामिष्ट्वा पश्चाद्वा तद्यजमानः पुरस्ताद्वा सोमेन यजेत तस्य सोमयागस्य होताध्वर्युर्ब्रह्मोद्गातेति चत्वारः ऋत्विजो मुख्याः ते च प्रत्येकं त्रिभिः त्रिभिः पुरुषैरुपेता अतस्तस्य तस्य एकैकस्योत्तरे त्रयः पुरुषा भवन्ति, त एते होत्रादिनामकाः षोडशर्त्विजो द्विरात्रादिभिरहीनसंज्ञकैरग्निष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति। एतएव होत्रादयः षोडशर्त्विजः स्वयमप्याहिताग्नयः प्रथमयज्ञेनाग्निष्टोमे-